श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवरदराजस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवरदराजस्तोत्रम् ॥

दद्यान्मे देवराजो वितरतु भगवान् मङ्गलं मङ्गलानाम्
आवासो हस्तिशैले मणिमयशिखरे शेखरो दीप्यमानः।
लक्ष्मीनाथो दयालुर्विधिमुखविबुधैर्वन्दितश्रीपदाब्जः
सर्वेषामिष्टदाता स्मितमधुरमुखः श्रीनिधिर्लोकनाथः ॥ **1** ॥

हस्त्यद्रौ पुण्यकोट्यां विलसितममलं वत्सलं देवराजं
शेषाद्यैः सूरिसङ्घैर्नतपदकमलं लोकनाथं दयालुम्।
पारावारप्रसूतापदकमललसल्लाक्षया लक्षिताङ्गं
वेदान्ते पाञ्चरात्रे प्रविदितविभवं वन्दिषीय क्षमाब्धिम् ॥ **2** ॥

तीरे श्रीवेगवत्या विलसति विमलैरुत्तरे पुण्यकोट्यां
सर्वाभीष्टप्रदाता प्रवरगुणनिधिर्देवराजो मुकुन्दः।
वेदान्तेषु प्रसिद्धः सरसिजनयनो भासमानप्रभावः
दिव्यं कल्याणमाद्यं दिशतु मम पदं वत्सलः स्वाश्रितानाम् ॥ **3** ॥

अनन्तगरुडादिभिः प्रणतपादपद्मो रमा -
स्तनस्तबकचञ्चलो वरदराजभृङ्गः सदा।
मुदा मम हृदम्बुजे रमतु हस्तिशैलप्रभुः
नितान्तललिताननः कमलदिव्यनेत्रोज्ज्वलः ॥ **4** ॥

सुवर्णमकुटोज्ज्वलं सुभगदिव्यनीलालकं
ललाटफलकोल्लसत्तिलकपुण्ड्रदीप्राननम्।
विचित्रमणिभूषणज्वलितनीलगात्रप्रभं
भजे करिगिरीश्वरं वरदराजमत्युज्ज्वलम् ॥ **5** ॥

रथाङ्गजलजाङ्कुशध्वजसरोजरेखादिभिः
स्वलङ्कृततलौ बहिर्विलसदिन्द्रनीलप्रभौ।
विकासिकमलोपमौ विविधरत्नभूषोज्ज्वलौ
करीशचरणौ भजे सकलभक्तसौख्यप्रदौ॥ **6**॥

सुकल्पकतरुश्रिया तुलितदिव्यजङ्घोज्ज्वलं
कनत्प्रभककुत्समज्वलितभास्वदूरुप्रभम्।
कटीतटसमुल्लसत्सुभगदिव्यपीताम्बरं
भजे करिगिरीश्वरं वरदमब्जनीलप्रभम्॥ **7**॥

सनाभिकनकप्रभज्वलितयज्ञसूत्रोज्ज्वलं
मणीन्द्रकमलालसद्विपुलदिव्यवक्षःस्थलम्।
करीन्द्रकरसन्निभस्फुरितवृत्तबाहोज्ज्वलं
भजे करिगिरीश्वरं विलसदंसभूषोज्ज्वलम्॥ **8**॥

लसद्गलसमुज्ज्वलस्फटिकरत्नहारोज्ज्वलं
विलास्यधरपल्लवप्रभवदिव्यमन्दस्मितम्।
सुफालतलमुन्नसं नमितसुन्दरभ्रूयुगं
भजे करिगिरीश्वरं विकचपद्मनेत्रोज्ज्वलम्॥ **9**॥

सुनीलघनसन्निभं सुभगदिव्यरत्नाढ्यक -
स्फुरन्मकुटशोभितं कनकदिव्यभूषोज्ज्वलम्।
दयागुणपयोनिधिं दरदलत्सरोजाननं
भजे करिगिरीश्वरं वरदराजमत्यद्भुतम्॥ **10**॥

अव्यादव्याजबन्धुर्दिवि भुवि जगतां वेदशास्त्रप्रशस्तः
लोकानामाभिमुख्ये त्वभिमतवरदो देवदेवाधिराजः।
भक्तानां दोषभोग्यः करिगिरिशिखरप्रोल्लसत्कल्पवृक्षः
संसाराब्धौ निमग्नं मदनपरवशं दुर्दशं दुर्गुणं माम्॥ **11**॥

मेघश्यामः कृपालुः करिगिरिशिखरप्रोज्ज्वलत्पारिजातः
पद्माक्षः पद्मपाणिः सरसिजवदनः सर्ववेदान्तवेद्यः।
मुक्तादामप्रभास्वन्मणिवरकमलावत्सजाज्वल्यवक्षाः
पित्रादिर्बन्धुवर्गो मम किल विविधः पातु मां देवराजः॥ 12 ॥

अब्जानाथः पदाब्जप्रणतजननिधिः प्रज्वलत्कौस्तुभादि -
श्रीभूषादीप्रगात्रः प्रवरगुणनिधिर्नीलमेघप्रभाभः।
सर्वज्ञः सर्वधाता शकनबलयुतः सत्यसङ्कल्पमानो
भूतानामादिबन्धुः करिगिरिवरदः पातु मां देवराजः॥ 13 ॥

असारं संसारं धिगशुचिमलाजं हृदय मे
निराबाधं नित्यं कमलनयनं शेषशयनम्।
करीशं कन्दर्पप्रभममलकल्याणगुणकं
मुरारिं लोकेशं मधुमथनमाद्यं भज हरिम्॥ 14 ॥

जगन्नाथं नाथं भज हृदय नाथं प्रणमताम्
अनाथं मानाथं कमलभववन्द्यं गुणनिधिम्।
पयः पारावारप्रभववदनं पद्मचरणं
मदीशं हस्तीशं मदनशततुल्यं मुरभिदम्॥ 15 ॥

करीशं लोकेशं कमलचरणं भक्तरमणम्
उमेशब्रह्मेन्द्रप्रमुखसुरसङ्घस्तुतपदम्।
घनाभं श्रीनाभिप्रविलसितसूत्रोज्ज्वलतनुं
भजेयं देवेशं शुभगुणसुधाम्भोनिधिमहम्॥ 16 ॥

रथाङ्गं श्रीशार्ङ्गं प्रणतजनरक्षार्थममलो
हरिः शङ्खं खड्गं सततमपि बिभ्रन्मुररिपुः।
गरिष्ठश्श्रेष्ठानां करिगिरिलसन् कल्पकतरुः
वरिष्ठं कल्याणं दिशतु मम वात्सल्यजलधिः॥ 17 ॥

कलानाथः क्षीरप्रभवलसदास्यस्मितरुचिः
दयासिन्धुर्बन्धुर्मम तु करिशैलोज्ज्वलतरुः।
जगन्नाथो दिव्यस्फटिकमकुटप्रोज्ज्वलतनुः
मम क्षेमं दद्यादतुलगुणवात्सल्यजलधिः॥ **18** ॥

विधीशाधीशानो विनतजनताकल्पकतरुः
करीशः पद्मेशः परमपुरुषो वत्सलतरः।
सुशीलो देवेशः कमलनयनः सौम्यवदनः
मम क्षेमं दद्यादतुलमहिमा भक्तरमणः॥ **19** ॥

सदामारामोराः करिगिरिशिरोभूषणवरः
दयापारावारः परमपुरुषो मङ्गलनिधिः।
गुणानां पाथोधिः सुभगसुलभोदारचरणो
मम क्षेमं दद्यादतुलमहिमा भक्तरमणः॥ **20** ॥

सकलभुवननाथः सर्वबन्धुर्दयालुः
विमलमधुरमन्दस्मेरवक्त्रारविन्दः।
कलशजलधिकन्याप्राणनाथो मुकुन्दः
प्रणतवरदराजः पातु मां देवराजः॥ **21** ॥

॥ इति श्रीवरदराजस्तोत्रं समाप्तम् ॥